# श्री सिद्धिविनायक पूजा क्रमं

## 13.09.2018 – गुरुवारं (सिम्हं 28 )



**ईश्वर गोपालः / रामकृष्णः कृतंः**

**www.pradosham.com**

# प्रदोषं प्रस्तावन सिद्धिविनायक पूजा अनुक्रमणिका

## श्री सिद्धिविनायक पूजा क्रमं

**Compilation of Shri Siddhivinayaka Pooja details and guidance to perform at home.**

***Note: This book is compiled with a intention to perform pooja with the help of Vadhyars/Sasthrigal***

**Compiled and presented by Eshwar Gopal/Shankar Ramakrishnan**
**- सम्स्कृतं -**

**www.pradosham.com**

**reachegopal@gmail.com; info@pradosham.com**

www.pradosham.com

# ॐ श्री विनायकचतुर्थि सिद्धिविनायक पूजा विधि:

## 1. पूर्वाङ्गपूजा

शुभं करोति कल्याणम् आरोग्यं धनसम्पद: । शत्रु बुद्धि विनाशाय दीपज्योतिर्नमोऽस्तुते ॥
दीपो ज्योति: परम् ब्रह्म दीपू ज्योतिर्जनार्दन: । दीपो हरतु मे पापं सन्ध्या दीपो नमोऽस्तु ते ॥

ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ न: शृण्वन्नूतिभि:सीद सादनम् ॥

गुरुर्ब्रह्मा गुरुर्विष्णु: गुरुर्देवो महेश्वर: । गुरु:साक्षात् परब्रह्म तस्मै श्री गुरवे नम: ।
गुरवे सर्वलोकानाम् भिषजे भवरोगिणां । निधये सर्वविद्यानाम् श्री दक्षिणा मूर्तये नम: ॥
अस्मिन् गुरुचरणारविन्दाभ्यां नम: ॥

आचम्य ॥

शुक्लाम् भरतरम् विष्णुम् शशिवर्णम् चतुर्भुजम् । प्रसन्नवदनम् ध्यायेत् सर्वविघ्न उपशान्तये ॥

प्राणायामं । ॐ भू: - ॐ भुव: - ॐगुं सुव: - ॐ मह: - ॐ जन: - ॐ तप: - ॐ गं सत्यम् ॐ तत्सवितुर्वरेण्यं। भर्गो देवस्य धीमहि । धियो यो न: प्रचोदयात्।

ॐ आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुव:सुवरोम् ॥

सङ्कल्पं : ममोपात्त समस्त दुरितक्षयद्वारा शृीपरमेश्वरप्रीत्यर्थं तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव शृी लक्ष्मीपते अऽङ्घ्रियुगं स्मरामि । करिष्यमाणस्य कर्मण: निर्विघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वर पूजां करिष्ये ॥ (एवं द्विवीयी) । अपउपस्पृश्य ॥ (Recite twice from Karishya Manasya and wash your hands) ॥

ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ न: शृण्वन्नूतिभि:सीद सादनम् ॥

ॐ शृीमन् महागणपतये नम: ॥ ॐ भूर्भुवस्सुवरोम् अस्मिन् हरिद्राबिम्बे सुमुखं सपरिवारम् विघ्नेश्वरं महागणपतिं ध्यायामि । आवहयामि ॥

ॐ महागणपतये नम: रत्नसिम्हासनं समर्पयामि । ॐ महागणपतये नम: । पादयो: पाद्यं समर्पयामि ।
ॐ महागणपतये नम: हस्तयो: अर्घ्यं समर्पयामि । ॐ महगणपतये नम: आचमनीयं समर्पयामि ।

ॐ महागणपतये नम: स्नपयामि । स्नानानन्तरं आचमनीयं समर्पयामि । (offer water).

ॐ महागणपतये नम: वस्त्रार्थं अक्षतान् समर्पयामि । (shower yellow rice).

ॐ महागणपतये नम: उपवीतार्थं अक्षतान् समर्पयामि । (shower yellow rice).

ॐ महागणपतये नम: दिव्यपरिमळ गन्धान् धारयामि । (daub chandan).

ॐ महागणपतये नम: गन्धस्योपरि हरिद्रा कुङ्कुमं समर्पयामि । (daub kumkum).

ॐ महागणपतये नम: अलङ्करणार्थं अक्षतान् समर्पयामि । (shower yellow rice).

ॐ महागणपतये नम: आभरणार्थे अक्षतान् समर्पयामि । (shower yellow rice).

ॐ महागणपतये नम: पुष्पमालां समर्पयामि । (garland the Deity).

ॐ महागणपतये नम: पुष्पै: पूजयामि । (recite the following mantras & shower flowers)

| | | | |
|---|---|---|---|
| ॐ सुमुखाय नम: (1) | ॐ एकदन्ताय नम: (2) | ॐ कपिलाय नम: | ॐ गजकर्णकाय नम: |
| ॐ लम्बोदराय नम: | ॐ विकटाय नम: | ॐ विघ्नराजाय नम: | ॐ विनायकाय नम: |
| ॐ धूमकेतवे नम: | ॐ गणाध्यक्षाय नम: | ॐ फालचन्द्राय नम: | ॐ गजाननाय नम: |
| ॐ वक्रतुण्डाय नम: | ॐ शूर्पकर्णाय नम: | ॐ हेरम्बाय नम: | ॐ स्कन्दपूर्वजाय नम: |
| ॐ सिद्धिविनायकाय नम: | ॐ महागणपतये नम: | नानाविध परिमळपत्रपुष्पाणि समर्पयामि ॥ | |

ॐ महागणपतये नम: । धूपं आघ्रापयामि ॥ (show dhoopam)

ॐ महागणपतये नम: । दीपं सन्दर्शयामि ॥ (show deepam)

ॐ महागणपतये नम: । धूपदीपानन्तरं आचमनीयं समर्पयामि ॥ (pour water)

ॐ महागणपतये नम: । निवेदनं समर्पयामि ॥ ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । **देवसवितप्रसुवा** ।। सत्यम त्वर्तेन परिषिञ्चयामि ॥ (perform Naivedyam) ॥

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा ।

ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा । ब्रह्मणि म आत्मा अमृतत्वाय।

ॐ महागणपतये नमः निवेदनं समर्पयामि ||

मध्ये मध्ये अमृतपानीयं समर्पयामि । अमृतापिधानमसि । हस्तप्रक्षालनं समर्पयामि । पादप्रक्षालनं समर्पयामि। पुनराचमनीयं समर्पयामि । ॐ भूर्भुवःसुवः । पूगीफलसमायुक्तं नागवल्ली दलैर्युतम्। कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ महागणपतये नम: । कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ महागणपतये नम: । कर्पूर ताम्बूलं समर्पयामि ॥

**नीराजन मन्त्रः**

ॐ श्री महागणपतये नमः । कर्पूर नीराजनम् सन्दर्शयामि ॥
वेदोक्त मन्त्रपुष्पं समर्पयामि । स्वर्णपुष्पं समर्पयामि ।
पारिजात पुष्पं समर्पयामि। छत्रं धारयामि। नृत्तं दर्शयामि। वाद्यं घोषयामि।
गीतं श्रावयामि। आन्दोळिकां आरोपयामि। अश्वं आरोपयामि। गजं आरोपयामि।
रथं आरोपयामि। समस्त राजोपचार-मन्त्रोपचार-वेदोपचारान् समर्पयामि॥

**अथ प्रार्थना**

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ।
धूमकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः । वक्रतुण्डः शूर्पकर्णो हेरम्ब स्कन्दपूर्वजः ॥
द्वादशैतानि नामानि यःपठेत् श्रुणुयादपि । विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥महागणपतये नमः अनेक कोटी प्रदक्षिण नमस्कारान् समर्पयामि।

## 2. प्रधान पूजा सङ्कल्पम्

### अनुज्ञा

ॐ ध्रुवन्ते राजावरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥

पर्वत इवाविचाचलिः । इन्द्र इवेह दृध्रुवस्तिष्ठ । इह राष्ट्रमुधारय । अभितिष्ठ पृतन्यतः। अधरे सन्तु शत्रवः। इन्द्र इव वृत्रहा तिष्ठ । सुमुहूर्तोऽस्तु। सुप्रतिष्ठितमस्तु ॥ ऋद्ध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयन्नोस्तु। अनूराधान् हविषा वर्द्धयन्तः। शतं जीवेम शरदः सवीराः॥ दीर्घायुष्य-मस्तु। हरिः ॐ ॥
नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशीनेभ्यः। यजाम देवान् यदि शक्नवाम मा ज्यायसः शंस मावृक्षि देवाः । ॐ नमस्सदसे नमस्सदसस्पतये नमस्सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै ॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
उत्तरोत्तराभिवृद्धिरस्तु ॥ दर्भेष्वासीनः । अपउपस्पृश्य । दर्भान् धारयमाणः ॥

**(पवित्रं कुर्यात्)** ***(wear pavithram and proceed to Pradhaana Sankalpam)***

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ (प्राणायमं कुर्यात्)

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीय परार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमेपादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणेपार्श्वे सहाब्धे अस्मिन् वर्तमाने (भरतखण्डस्य मेरोः पश्चिमदिग्भागे उत्तरे पार्श्वे अराभ्य महासमुद्रतीरे केतुमाल्य वर्षे दुबै/अबुदाभि महानगर्यां) प्रभवादीनां षष्ठ्याः संवत्सरानां मध्ये विळम्बि नाम संवत्सरे दक्षिणायन वर्ष ऋतौ सिम्ह मासे शुक्ल पक्षे चतुर्थ्याम् शुभतिथौ वासरः वासरस्तु गुरु वासरयुक्तायां स्वाती नक्षत्रयुक्तायां माहेन्द्र् नाम योग वणजै ततुपरी भद्रै नाम करण एवङ्गुण विशेषेण विशिष्टायां चतुर्थ्याम् शुभतिथौ, ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वरप्रीत्यर्थं -------गोत्रोद्भवस्य (gothram) ------ नक्षत्रे (star) ------ राशौ जातस्य (zodiac sign) ------ शर्मणः (your name) मम or (अस्य यजमानस्य) ------ नक्षत्रे (star) ------ राशौ (zodiac sign) जातायाः ------ नाम्नयाः (wife's name) मम धर्मपत्न्याश्च (or अस्य यजमानस्य धर्मपत्न्याश्च) अस्माकं सहकुटुम्बानां ब न्धुजनवर्गस्य सर्वेषां भक्तजनानां, महाजनानां कृत्तिका नक्षत्रादि अपभरणि अन्तेषु अष्टाविंशति नक्षत्रेषु, मेषादि मीन पर्यन्तेषु द्वादशराशिषु जातानां शुभ नामधेयानां वेदोक्त पूर्ण आयुषः अभिवृध्यर्थं, स्त्रीणां युवतीनां कण्यकानां सौन्दर्य सौशील्यादि शोभन गुण अभिवृध्यर्थं उचित काले आयुश्मत् स्वरूप सुगुणानेक सुपुत् अवाप्त्यर्थं धीर्घ सौमङ्गल्य अवाप्त्यर्थं अरोग आरोग्य दृडगात्रता सिध्यर्थं श्री सिद्धिविनायक कृपा कडाक्ष पूसादसिध्यर्थं समस्त मङ्गळ अवाप्यर्थम् – सिद्धिविनायक पूसादेन ज्ञान वैराग्य सिद्ध्यर्थं, सिद्धिविनायक पूसाद सिद्ध्यर्थं वार्षीक चतुर्थि महोत्सव दिने यथा शक्ति ध्यान आवाहनादि षोडचोपचार पूजाम् करिष्ये । तदङ्गम् कलश पूजाम् च करिष्ये ॥ (wear away the pushpam-akshatha from hand and say ) अपउपस्पृश्य ॥ (wash your hands) ॥

## ॥ श्री महागणपति यथास्थानम् (उद्यापनम्) ॥

अस्माद् हरिद्राबिम्बाद् सुमुखं सपरिवारं विघ्नेश्वरं महागणपतिं यथासुखं यथास्थानं प्रतिष्ठापयामि । शोभनार्थे क्षेमाय पुनरागमनाय च ॥ (Shower the pushpa-akshathai over shri MahagaNapathi and Move Him little bit towards north side). (Accept the Prasadam humbly and prostrate)

## 3. घण्ट पूजा विधिः

घण्टाय नमः । दिव्यपरिमळ गन्धान्धारयामि । (घण्टानादं कृत्वा (Ring the bell while reciting mantra)) आगमार्थं तु देवानां गमनार्थं तु रक्षसां। कुर्यात् घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥ **अपसर्पन्तु ते भूता ये भूता भुविसंस्थिताः। ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया** ॥

## 4. कलश पूजा

कलशं गन्ध-अक्षत-पत्र-पुष्पैः अभ्यर्च्य, कलशं स्पृष्ट्वा।
(Fill pancha-pathram with water, daub chandan/kumkum on the four sides of the vessel)
ॐ कलशाय नमः दिव्यपरिमळ गन्धान्धारयामि । (put flower, akshatha inside)
ॐ कलशाय नमः दिव्यपरिमळ गन्धान्धारयामि । (put flower, akshatha inside)
ॐ गङ्गायै नमः । ॐ यमुनायै नमः । ॐ गोदावर्यै नमः । ॐ सरस्वत्यै नमः ।
ॐ नर्मदायै नमः । ॐ सिन्धवे नमः । ॐ कावेर्यै नमः। सप्त कोटि महातीर्थानि आवाहयामि ॥ (keep your right palm facing down on the top of the panchapathram and recite the following mantras )
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रिताः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाःस्मृताः।
कुक्षौ तु सागराःसर्वे सप्तद्वीपा वसुन्धरा॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
अङ्गैश्च सहिताःसर्वे कलशाम्बुसमाश्रिताः। आयान्तु सिद्धिविनायक पूजार्थं दुरितक्षयकारकाः ।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
(कलश जलेन सर्वोपकरणानि सर्वपूजाद्रव्याणि च प्रोक्ष्य आत्मानञ्च प्रोक्ष्यात्) ॥
(sprinkle water from Kalasham over pooja/abhisheka items and self)

## 5. शङ्ख पूजा

कलश जलेन शङ्खं प्रक्षाल्य; पुनः कलश जलेन शङ्खं गायत्र्या प्रपूरय ।
ॐ पाञ्चजन्याय नमः दिव्यपरिमळगन्धां धारयामि ।

ॐ शङ्खमूले ब्रह्मणे नमः । ॐ शङ्खमध्ये विष्णवे नमः । ॐ शङ्खाग्रे रुद्राय नमः ।
ॐ आदित्यमण्डलाय नमः । ॐ सोममण्डलाय नमः । ॐ चन्द्रशेखराय नमः ।

शङ्खं चन्द्रागृदैवत्यं मध्ये वरुणसंयुतम् । पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वति ॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया। शङ्खे तिष्ठन्ति विप्रेन्द्राः तस्माच्छङ्खं प्रपूजयेत्॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। पूजितः सर्वदेवैश्च पाञ्चजन्यम् नमोऽस्तु ते ॥

गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा । तव नादेन पाताळे पाञ्चजन्यम् नमोऽस्तु ते ॥

www.pradosham.com

ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः शङ्खः प्रचोदयात् ॥ (Recite 5 times silently)

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवःसमिंधते ।

विश्वस्यां विशि प्रविविशिवाग्ं समीमहे स नो मुञ्चत्वग्ंहसः ।

शङ्ख जलेन कलशं पूरयित्वा ॥ (Pour water from Conch to Kalasham) शिष्ट जलेन ॐ भूर्भुवःसुवो भूर्भुवःसुवो भूर्भूवस्सुवः इति सर्वोपकरणानि प्रोक्ष्य आत्मानं च प्रोक्ष्य । तच्छेषं विसृज्य । (sprinkle water over puja dravyams, on self and pour the balance water on the earth). कलश जलेन पुनः शङ्खं गायत्र्या पूरयित्वा ॥ (pour water from Kalasham to conch, reciting Gaayathri mantram three times).

## 6. आत्मपूजा विधिः

ॐ आत्मने नमः । दिव्यपरिमळगन्धान् धारयामि ।
ॐ आत्मने नमः । ॐ अन्तरात्मने नमः । ॐ जीवात्मने नमः । ॐ योगात्मने नमः।
ॐ परमात्मने नमः । ॐ ज्ञानात्मने नमः । समस्तोपचारान् समर्पयामि ।

देहो देवालयः प्रोक्तो जीवो देवः सनातनः । त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥

## 7. सिद्धिविनायक ध्यान आवाहनं

करिष्ये गणनादस्य व्रतम् सम्पत्करम् शुभम् । भक्तानाम् **वरतम्** सर्वमङ्गल **कारणम्** । एकदन्तम् शूर्पकर्णं गजवक्त्रम् चतुर्भुजम् । पाशाङ्कुशधरम् देवम् ध्यायेत् सिद्धिविनायकम् ॥

ध्यायेत् गजाननम् देवम् तप्त – काञ्चन-सन्निभम् । चतुर्भुजम् महाकायम् सर्वाभरण भूशितम् ॥ **अस्मिन् मृत्तिका बिम्बे श्री** सिद्धिविनायकम् ध्यायामि ॥ **अत्रागच्छ** जगत्**वन्द्य** सुरराजा**र्चि**तेश्वर । अना**थ**नाथ **सर्वज्ञ गीर्वाण** सुरपूजित ॥

**१**) ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम्। श्रीमन् महागणपतये नमः।

ॐ गणानां त्वा गणपतिग्ं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्व**न्नू**तिभिःसीद सादनम् ॥ अस्मिन् **मृत्ति**का बिम्भे सिद्धिविनायकं आवाहयामि ॥

www.prapdosham.com

# प्राणप्रतिष्ठा

सिद्धिविनायक **स्वरूपस्य**, प्राणप्रतिष्ठमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामाथर्वाणि छन्दांग्ंसि। सकलजगत्सृष्टिस्थिति संहार कारिणी प्राणशक्तिः परादेवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । सिद्धिविनायक **स्वरूपस्य** प्राणप्रतिष्ठार्थे जपे विनियोगः ॥

आं - अंगुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । क्रों मध्यमाभ्यां नमः । आं अनामिकाभ्यां नमः । ह्रीं कनिष्ठकाभ्यां नमः । क्रों करतलकरपृष्ठाभ्यां नमः ॥

आं हृदयाय नमः । ह्रीं शिरसे स्वाहा । क्रों शिखायै वषट् । आं कवचाय हुं । ह्रीं नेत्रत्रयाय वौषट्। क्रों अस्त्राय फट् । भूर्भूवस्सुवरोमिति दिग्बन्धः ॥

## ॥ **ध्यानम्** ॥

रक्ताम्भोधिस्थ पोतोल्लसदरुण सरोजाधिरूढाकराब्जैः पाशं कोदण्डमिक्षूद्भवमळिगुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणासृक्कपालं त्रिणयन लसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरीप्राणशक्तिः परा नः॥

लं पृथिव्यात्मिकायै गन्धं समर्पयामि । हं आकाशात्मिकायै पुष्पैः पूजयामि । यं वाय्वात्मिकायै धूपमाघ्रापयामि । रं अग्नयात्मिकायै दीपं दर्शयामि । वं अमृतात्मिकायै अमृतं महानैवेद्यं निवेदयामि । सं सर्वात्मिकायै सर्वोपचार पूजां समर्पयामि ॥

आं ह्रीं क्रों, क्रों ह्रीं आं यरलवशषसहोम् । क्षं हंसः सोऽहं, सोऽहं हंसः । सिद्धिविनायक **स्वरूपस्य** प्राण इह प्राणाः॥

आं ह्री क्रों, क्रों ह्रीं आं यरलवशषसहोम् । क्षं हंसः सोऽहं, सोऽहं हंसः । सिद्धिविनायक **स्वरूपस्य** जीव इह स्थितः ॥

आं ह्रीं क्रों, क्रों ह्रीं आं यरलवशषसहोम् । क्षं हंसः सोऽहं, सोऽहं हंसः । सिद्धिविनायक **स्वरूपस्य** सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्र-जिह्वा-घ्राण-प्रानापान-व्यानोदान-समाना इहैवागत्य इहैवास्मिन् मृत्तिका बिम्बे सिद्धिविनायकं सुखं चिरं तिष्ठन्तु स्वाहा ॥ (ॐ गं गणपतये नमः।)

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृळया नस्स्वस्ति ॥

| | | | |
|---|---|---|---|
| आवाहितो भव। | स्थापितो भव। | सन्निहितो भव। | सन्निरुद्धो भव। |
| अवकुण्ठितो भव। | सुप्रीतो भव। | सुप्रसन्नो भव। | वरदो भव। |
| सर्वाभीष्टप्रदो भव। | स्वागतमस्तु । | प्रसीद प्रसीद ॥ | |

www.pradosham.com

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वं प्रीतिभावेन मृत्तिकाबिम्भेऽस्मिन् सन्निधिं कुरु॥

सिद्धिविनायकाय नमः प्राणान् प्रतिष्ठापयामि ॥ (यत्किंचिन्निवेदनम्॥) **अत्रागच्छ** ॥

२) पुरुष एवेदगं सवम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति।

ॐ श्री सिद्धिविनायकाय नमः । रत्न सिंहासनं समर्पयामि।

३) एतावानस्य महिमा। अतो ज्यायाग्श्च पूरुषः। पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। ॐ श्री सिद्धिविनायकाय नमः। पादयोः पाद्यं समर्पयामि ।

४) त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि।

ॐ श्री सिद्धिविनायकाय नमः। अर्घ्यं समर्पयामि ।

५) तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः ।

ॐ श्री सिद्धिविनायकाय नमः। आचमनीयं समर्पयामि ।

६) यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः ।

ॐ श्री सिद्धिविनायकाय नमः । मधुपर्कं समर्प्यामि ।

७) सप्तास्यासन्परिधयः । त्रिःसप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम्।

ॐ श्री सिद्धिविनायकाय नमः। स्नानं समर्पयामि । (If you are doing abhishekam with 'गणपत्यथर्वशीर्षोपनिषत्' then you say "Snaanantharam…..after reciting this Upanishad)(स्नानानन्तरं आचमनीयं समर्पयामि ॥

## गणपत्यथर्वशीर्षोपनिषत्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्यो अरिष्टनेमिः । स्वस्तिनो बृहस्पतिर्दधातु ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

www.pradosham.com

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्ताऽसि । त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि नित्यम्। (१) ऋतं वच्मि । सत्यं वच्मि ॥२॥

अवत्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम्। अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥३॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाऽद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥५॥

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥६॥

गणादिं पूर्वमुच्चार्य वर्णादीं स्तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् । तारेण ऋद्धम् । एतत्तव मनुस्वरूपम्। गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम्। बिन्दुरुत्तररूपम् । नादः सन्धानम् । संहिता सन्धिः । सैषा गणेशविद्या । गणक ऋषिः । निचृदगायत्रीच्छन्दः । गणपतिर्देवता । ॐ गं गणपतये नमः ॥७॥

**एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात्** ॥८॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् । रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ।

www.pradosham.com

भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् । एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥९॥

नमो व्रातपतये । नमो गणपतये । नमःप्रमथपतये । नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ॥१०॥

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्नबाध्यते । स सर्वत्र सुखमेधते। स पञ्चमहापापात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद् दास्यति स पापीयान् भवति । सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् ॥११॥

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चर्तुर्थ्यामनश्नन् जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम्। ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ॥१२॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति। यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्य समिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥१३॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद । इत्युपनिषत् ॥ १४॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

www.pradosham.com

८) तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रत: । तेन देवा अयजन्त। साध्या ऋषयश्च ये।

ॐ श्री सिद्धिविनायकाय नम: । वस्त्रोत्तरीयं समर्पयामि ।

९) तस्माद्यज्ञात्सर्वहुत: । संभृतं पृषदाज्यम् । पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ।

ॐ श्री सिद्धिविनायकाय नम: । यज्ञोपवीतम् समर्पयामि । आभरणार्थे अक्षतान् समर्पयामि ||

१०) तस्माद्यज्ञात्सर्वहुत:। ऋच: सामानि जज्ञिरे। छन्दांग्सिजज्ञिरे तस्मात्। यजुस्तस्मादजायत ||

ॐ श्री सिद्धिविनायकाय नम:। दिव्य परिमळगन्धान् धारयामि। गन्धस्योपरि हरिद्रा कुङ्कुमं समर्पयामि।

११) तस्मादश्वा अजायन्त । ये के चोभयादत: । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावय:।

ॐ श्री सिद्धिविनायकाय नम: । पुष्पमालां समर्पयामि। पुष्पै: पूजयामि।

## 8. अङ्ग पूजा

| | | |
|---|---|---|
| ॐ पार्वती नन्दनाय नम: **(1)** | पादौ पूजयामि **(1)** | Feet **(1)** |
| ॐ गणेशाय नम: **(2)** | गुल्फौ पूजयामि | Ankle |
| ॐ जगद्धात्रे नम: | जङ्घे पूजयामि | Shank |
| ॐ जगद्वल्लभाय नम: | जानुनी पूजयामि | Knee |
| ॐ उमापुत्राय नम: | ऊरू पूजयामि | Thigh |
| ॐ विकटाय नम: | कटिं पूजयामि | Waist |
| ॐ गुहाग्रजाय नम: | गुह्यम् पूजयामि | Pvt. Organs |
| ॐ महत्तमाय नम: | मेढ्रम् पूजयामि | Pvt. Organs - Gents |
| ॐ नाथाय नम: | नाभिं पूजयामि | Navel |
| ॐ उत्तमाय नम: | उदरं पूजयामि | Stomach |
| ॐ विनायकाय नम: | वक्षस्थलम् पूजयामि | Chest |
| ॐ पाशच्छिदे नम: | पार्श्वौ पूजयामि | Flanks |
| ॐ हेरम्बाय नम: | हृदयम् पूजयामि | Heart |
| ॐ कपिलाय नम: | कण्ठम् पूजयामि | Neck |
| ॐ स्कन्दाग्रजाय नम: | स्कन्धौ पूजयामि | Shoulders |
| ॐ हरसुताय नम: | हस्तान् पूजयामि | Hands |
| ॐ ब्रह्मचारिणे नम: | बाहून् पूजयामि | Arms |
| ॐ सुमुखाय नम: **(17)** | मुखम् पूजयामि **(17)** | Face **(17)** |

www.pradosham.com

| | | |
|---|---|---|
| ॐ एकदन्ताय नम: **(18)** | दन्तौ पूजयामि **(18)** | **Teeth (18)** |
| ॐ विघ्नहन्त्रे नम: | नेत्रौ पूजयामि | **Eyes** |
| ॐ शूर्पकर्णाय नम: | कर्णौ पूजयामि | **Ears** |
| ॐ फालचन्द्राय नम: | फालम् पूजयामि | **Fore-head** |
| ॐ नागाभरणाय नम: | नासिकां पूजयामि | **Nose** |
| ॐ चिरन्तनाय नम: | चुबुकम् पूजयामि | **Chin** |
| ॐ स्थूलोष्ठाय नम: | ओष्ठौ पूजयामि | **Lips** |
| ॐ गलन्मदाय नम: | कण्ठं पूजयामि | **Neck** |
| ॐ कपिलाय नम: | कचान् पूजयामि | **Hair** |
| ॐ शिवप्रियाय नम: | शिर: पूजयामि | **Head** |
| ॐ सर्वमङ्गलासुताय नम: - सर्वाण्यङ्गानि पूजयामि ॥ (whole body) | | |

## 9. एकविंशति पत्र पूजा

| | |
|---|---|
| ॐ उमापुत्राय नम: | माची पत्रं समर्पयामि |
| ॐ हेरम्बाय नम: | बृहतीपत्रं समर्पयामि |
| ॐ लम्बोदराय नम: | बिल्वपत्रं समर्पयामि |
| ॐ द्विरदाननाय नम: | दूर्वां समर्पयामि |
| ॐ धूमकेतवे नम: | दुर्धूरपत्रं समर्पयामि |
| ॐ बृहते नम: | बदरीपत्रं समर्पयामि |
| ॐ अपवर्गदाय नम: | अपामार्गपत्रं समर्पयामि |
| ॐ द्वैमातुराय नम: | तुलसीपत्रं समर्पयामि |
| ॐ चिरन्तनाय नम: | चूतपत्रं समर्पयामि |
| ॐ कपिलाय नम: | करवीरपत्रं समर्पयामि |
| ॐ विष्णुस्तुताय नम: | विष्णुक्रान्तपत्रं समर्पयामि |
| ॐ अमलाय नम: | आमलकीपत्रं समर्पयामि |
| ॐ महते नम: | मरुवकपत्रं समर्पयामि |
| ॐ सिन्धुराय नम: | सिन्धूरपत्रं समर्पयामि |
| ॐ गजाननाय नम: | जातीपत्रं समर्पयामि |
| ॐ गण्डगलन्मदाय नम: | गण्डलीपत्रं समर्पयामि |
| ॐ शङ्करीप्रियाय नम: | शमीपत्रं समर्पयामि |
| ॐ भृङ्गराजत्कटाय नम: | भृङ्गराजपत्रं समर्पयामि |

www.pradosham.com

| | |
|---|---|
| ॐ अर्जुनदन्ताय नम: | अर्जुनपतृं समर्पयामि |
| ॐ अर्कप्रभाय नम: | अर्कपतृं समर्पयामि |
| ॐ एकदन्ताय नम: | दाडिमीपतृं समर्पयामि |

## 10. एकविंशति पुष्पपूजा

| | |
|---|---|
| ***(Worship with 21 varieties of flowers as much as available)*** | |
| ॐ पञ्चास्य गणपतये नम: | पुन्नाग पुष्पं समर्पयामि |
| ॐ महागणपतये नम: | मन्दार पुष्पं समर्पयामि |
| ॐ धीरगणपतये नम: | दाडिमी पुष्पं समर्पयामि |
| ॐ विष्वक्सेन गणपतये नम: | वकुल पुष्पं समर्पयामि |
| ॐ आमोद गणपतये नम: | अमृणाल पुष्पं समर्पयामि |
| ॐ प्रमथ गणपतये नम: | पाटली पुष्पं समर्पयामि |
| ॐ रुद्र गणपतये नम: | द्रोण पुष्पं समर्पयामि |
| ॐ विद्या गणपतये नम: | दुर्धूर पुष्पं समर्पयामि |
| ॐ विघ्न गणपतये नम: | चम्पक पुष्पं समर्पयामि |
| ॐ दुरित गणपतये नम: | रसाल पुष्पं समर्पयामि |
| ॐ कामितार्थप्रद गणपतये नम: | केतकी पुष्पं समर्पयामि |
| ॐ सम्मोह गणपतये नम: | माधवी पुष्पं समर्पयामि |
| ॐ विष्णु गणपतये नम: | शम्याक पुष्पं समर्पयामि |
| ॐ ईश गणपतये नम: | अर्क पुष्पं समर्पयामि |
| ॐ गजास्य गणपतये नम: | कल्हार पुष्पं समर्पयामि |
| ॐ सर्वसिद्धि गणपतये नम: | सेवन्तिका पुष्पं समर्पयामि |
| ॐ वीर गणपतये नम: | बिल्व पुष्पं समर्पयामि |
| ॐ कन्दर्प गणपतये नम: | करवीर पुष्पं समर्पयामि |
| ॐ उच्छिष्ट गणपतये नम: | कुन्द पुष्पं समर्पयामि |
| ॐ ब्रह्म गणपतये नम: | पारिजात पुष्पं समर्पयामि |
| ॐ ज्ञान गणपतये नम: | जाती पुष्पं समर्पयामि |

www.praposhram.com

## 11. एकविंशति दूर्वायुग्म पुजा

| (worship with twin Grasses of Dhoorva) | |
|---|---|
| ॐ गणाधिपाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ पाशाङ्कुशधराय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ आहुवाहनाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ विनायकाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ ईशपुत्राय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ सर्वसिद्धिप्रदाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ एकदन्ताय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ इभवक्त्राय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ मूषिकवाहनाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ कुमारगुरवे नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ कपिलवर्णाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ ब्रह्मचारिणे नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ मोदकहस्ताय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ सुरश्रेष्ठाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ गजनासिकाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ कपित्थफलप्रियाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ गजमुखाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ सुप्रसन्नाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ सुराग्रजाय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ उमापुत्राय नम: | दूर्वायुग्मम् समर्पयामि |
| ॐ स्कन्दप्रियाय नम: | दूर्वायुग्मम् समर्पयामि |

## 12. श्री गणेश अष्टोत्रम्

| | | |
|---|---|---|
| ॐ विनायकाय नम: **(1)** | ॐ विघ्नराजाय नम: **(2)** | ॐ गौरीपुत्राय नम: **(3)** |
| ॐ गणेष्वराय नम: | ॐ स्कन्दाग्रजाय नम: | ॐ अव्ययाय नम: |
| ॐ भूताय नम: | ॐ दक्षाय नम: | ॐ अध्यक्षाय नम: |
| ॐ द्विजप्रियाय नम: 10 | ॐ अग्निगर्भच्छिदे नम: | ॐ **इन्द्र**श्रीप्रदाय नम: |
| ॐ वाणीप्रदाय नम: | ॐ अव्ययाय नम: | ॐ सर्वसिद्धिप्रदाय नम: |
| ॐ शर्वतनयाय नम: | ॐ शर्वरीप्रियाय नम: | ॐ सर्वात्मकाय नम |

www.pradosham.com

| | | |
|---|---|---|
| ॐ सृष्टिकर्त्रे नमः | ॐ देवाय नमः **(20)** | ॐ अनेकार्चिताय नमः |
| ॐ शिवाय नमः | ॐ शुद्धाय नमः | ॐ बुद्धिप्रियाय नमः |
| ॐ शान्ताय नमः | ॐ ब्रह्मचारिणे नमः | ॐ गजाननाय नमः |
| ॐ द्वैमातुराय नमः | ॐ मुनिस्तुत्याय नमः | ॐ भक्तिविघ्नविनाशनाय नमः **30** |
| ॐ एकदन्ताय नमः | ॐ चतुर्बाहवे नमः | ॐ चतुराय नमः |
| ॐ शक्तिसम्युताय नमः | ॐ लम्बोदराय नमः | ॐ शूर्पकर्णाय नमः |
| ॐ हरये नमः | ॐ ब्रह्मविदुत्तमाय नमः | ॐ कालाय नमः |
| ॐ गृहपतये नमः **(40)** | ॐ कामिने नमः | ॐ सोमसूर्याग्निलोचनाय नमः |
| ॐ पाशाङ्कुशधराय नमः | ॐ चण्डाय नमः | ॐ गुणातीताय नमः |
| ॐ निरञ्जनाय नमः | ॐ अकल्मषाय नमः | ॐ स्वयंसिद्धाय नमः |
| ॐ सिद्धार्चितपदाम्बुजाय नमः | ॐ बीजापूरफलासक्ताय नमः | ॐ वरदाय नमः (51) |
| ॐ शाश्वताय नमः | ॐ कृतिने नमः | ॐ द्विजप्रियाय नमः |
| ॐ वीतभयाय नमः | ॐ गदिने नमः | ॐ चक्रिणे नमः |
| ॐ इक्षुचापधृते नमः | ॐ श्रीदाय नमः | ॐ अजाय नमः **(60)** |
| ॐ उत्पलकराय नमः | ॐ श्रीपतये नमः | ॐ स्तुतिहर्षिताय नमः |
| ॐ कुलाद्रिभेत्रे नमः | ॐ जटिलाय नमः | ॐ कलिकल्मनाशनाय नमः |
| ॐ चन्द्रचूडामणये नमः | ॐ कान्ताय नमः | ॐ पापहारिणे नमः |
| ॐ समाहिताय नमः **70** | ॐ आश्रिताय नमः | ॐ श्रीकराय नमः |
| ॐ सौम्याय नमः | ॐ भक्तवाञ्छितदायकाय नमः | ॐ शान्ताय नमः |
| ॐ कैवल्यसुखदाय नमः | ॐ सच्चिदानन्दविग्रहाय नमः | ॐ ज्ञानिने नमः |
| ॐ दयायुताय नमः | ॐ दान्ताय नमः **80** | ॐ ब्रह्मद्वेषविवर्जिताय नमः |
| ॐ प्रमत्तदैत्यभयदाय नमः | ॐ श्रीकण्ठाय नमः | ॐ विबुधेश्वराय नमः |
| ॐ रमार्चिताय नमः | ॐ विधये नमः | ॐ नागराजयज्ञोपवीतकाय नमः |
| ॐ स्थूलकण्ठाय नमः | ॐ स्वयम्कर्त्रे नमः | ॐ सामघोषप्रियाय नमः **90** |
| ॐ परस्मै नमः | ॐ स्थूलतुण्डाय नमः | ॐ अग्रण्यै नमः |
| ॐ धीराय नमः | ॐ वागीशाय नमः | ॐ सिद्धिदायकाय नमः |
| ॐ दूर्वाबिल्वप्रियाय नमः | ॐ अव्यक्तमूर्तये नमः | ॐ अद्भुदमूर्तिमते नमः |
| ॐ शैलेन्द्रतनुजोत्सङ्गखेलनोत्सुखमानसाय नमः | ॐ स्वलावण्यसुधासारजितमन्मथविग्रहाय नमः | |
| ॐ समस्तजगदाधाराय नमः | ॐ मायिने नमः | ॐ मूषिकवाहनाय नमः |
| ॐ हृष्टाय नमः | ॐ तुष्टाय नमः | ॐ प्रसन्नात्मने नमः |

www.pradosham.com

| | |
|---|---|
| ॐ सर्वसिद्धिप्रदायकाय नमः **(108)** | ॐ सिद्धिविनायकाय नमः ॥ |

| |
|---|
| नानाविध परिमळ पत्र पुष्पाणि समर्पयामि ॥ |

## 13. श्री सङ्कट नाशन गणेशस्तोत्रं

**नारद उवाच ।**

**प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् । भक्तावासं स्मरेन्नित्यमायुः कामार्थसिद्धये ॥ (1)**
**प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् । तृतीयं कृष्णपिंगाक्षं गजवक्त्रं चतुर्थकं ॥ (2)**
**लम्बोदरं पंचमं च षष्ठ विकटमेव च । सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमं ॥ (3)**
**नवमं फालचन्द्रं च दशमं तु विनायकम् । एकादशं गणपतिं द्वादशं तु गजाननं** ॥ (4)
**द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः । न च विध्नभयं तस्य सर्वसिद्धिकरं परं** ॥ (5)
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् । पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिं ॥ (6)
**जपेग्द गणपतिस्तोत्रं षड् भिर्मासैः फ़लं लभेत् । वसंवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ (7)**
**अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् । तस्य विद्या भवेत् सर्वा गणेशस्य प्रसादतः ॥ (8)**

**१२.** यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।

ॐ श्री सिद्धिविनायकाय नमः । **धूपं आघ्रापयामि** ॥

**१३.** ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः । पद्भ्यां्ग् शूद्रो अजायत ।

**ॐ श्री सिद्धिविनायकाय नमः । दीपं दर्शयामि ॥ धूपदीपानन्तरम् आचमनीयं समर्पयामि ॥**

**१४.** ॐ भूर्भुवःसुवः............. ब्रह्मणे स्वाहा ।
चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ।

ॐ श्री सिद्धिविनायकाय नमः । कदळी फलं, शाल्यान्नं, चनकं, मोदकं,लड्डुकं, बीजापूरफलं, जम्बूफलं, कपित्थफलं, इक्षुदण्डं, घृतगुळ पायसं, गुडापूपं, पृथुकं महानैवेद्यं निवेदयामि ॥ मध्ये मध्ये अमृतपानीयं समर्पयामि । अमृतापिधानमसि ॥ हस्तप्रक्षालणं समर्पयामि । पादप्रक्षालणं समर्पयामि । पुनराचमनीयं समर्पयामि ।

**१५.** नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्ं अकल्पयन् ॥

ॐ **श्री** सिद्धिविनायकाय नमः । कर्पूरताम्बूलं निवेदयामि ॥

www.pradosh...com

१६. वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे। सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते। ॐ श्री सिद्धिविनायकाय नमः । कर्पूरनीराजनं दर्शयामि। रक्ष रक्षान्धारयामि।

१७. धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। ॐ श्री सिद्धिविनायकाय नमः । वेदोक्त मन्त्रपुष्पं समर्पयामि।

१८. यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः ॥ ॐ श्री सिद्धिविनायकाय नमः। प्रदक्षिण नमस्कारान् समर्पायामि ॥

## 14. क्षीर अर्घ्यप्रदानं

अध्य पूर्वोक्त एवङ्गुण विसेषण विसिष्ठायाम् अस्याम् चतुर्थ्याम् शुभतिथौ परमेश्वर प्रीत्यर्थम् सिद्धिविनायक पूजाफल सम्पूर्णदा सिद्ध्यर्थं क्षीरार्घ्य प्रदानं उपायन दानञ्च करिष्ये ॥

1) गौर्यङ्गमल सम्भूत ज्येष्ठस्वामिन् गणेश्वर । गृहाणार्घ्यं मया दत्तम् गजवक्त्र नमोस्तुते । सिद्धिविनायकाय नम: इदं अर्घ्यं (3 times) ॥

2) अर्घ्यं गृहाण हेरम्ब सर्व सिद्धि प्रदायक: । विनायक मया दत्तम् पुष्पाक्षत समन्वितं ॥ सिद्धिविनायकाय नम: इदं अर्घ्यं (3 times) ॥

3) विनायक नमस्तेस्तु गन्ध पुष्प अक्षतान् युदम् । गृहाणार्घ्यं मया दत्तम् सर्वाभीष्ट प्रदोभव ॥ सिद्धि विनायकाय नम: इदं अर्घ्यं ॥ (3 times)

अनेन अर्घ्य प्रदानेन भगवान् सर्वात्मक: सिद्धिविनायक: प्रीयताम्.

गणेश प्रतिगृह्णाति गणेशोवै ददाति च । गणेश: तारको द्वाभ्याम् गणेशाय नमो नम: ॥

इदम् उपायनम् स-दक्षिणकम् स-ताम्बूलम्, महा गणपति स्वरूपाय ब्राह्मणाय तुभ्यमहं सम्प्रदते न मम ॥

मन्त्रहीनम् क्रियाहीनम् भक्तिहीनम् सुरेश्वर । यत् पूजितम् मया देव परिपूर्णम् ततस्तु ते ॥ अन्यापूजया सिद्धि विनायक: प्रीयताम्. ॐ तत् सत् ब्रह्मार्पणमस्तु ॥

***********

www.pradosham.com

## 15. पुण: पूजा (next day)

आचम्य………..

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ (प्राणायमं कुर्यात्)

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीय परार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमेपादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणेपार्श्वे सहाब्धे अस्मिन् वर्तमाने (भरतखण्डस्य मेरोः पश्चिमदिग्भागे उत्तरे पार्श्वे अराभ्य महासमुद्रतीरे केतुमाल्य वर्षे दुबै/अबुदाभि महानगर्यां) प्रभवादीनां षष्ठ्या: संवत्सरानां मध्ये विळम्बि नाम संवत्सरे दक्षिणायन वर्षे ऋतौ सिम्ह मासे शुक्ल पक्षे पञ्चम्यां शुभतिथौ वासरः वासरस्तु भृगु वासरयुक्तायां विशाखा नक्षत्रयुक्तायां वैदृती नाम योग भव ततुपरी बालव नाम करण एवङ्गुण विशेषेण विशिष्टायां पञ्चम्यां शुभतिथौ, ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वरप्रीत्यर्थं अस्माकं सहकुटुम्बानां बन्धुजनवर्गस्य सर्वेषां भक्तजनानां, महाजनानां कृत्तिका नक्षत्रादि अपभरणि अन्तेषु अष्टाविंशति नक्षत्रेषु, मेषादि मीन पर्यन्तेषु द्वादशराशिषु जातानां शुभ नामधेयानां वेदोक्त पूर्ण आयुषः अभिवृध्यर्थं, स्त्रीणां युवतीनां कण्यकानां सौन्दर्य सौशील्यादि शोभन गुण अभिवृध्यर्थं उचित काले आयुश्मत् स्वरूप सुगुणानेक सुपुत् अवाप्त्यर्थं धीर्घ सौमङ्गल्य अवाप्त्यर्थं अरोग आरोग्य दृडगात्रता सिध्यर्थं श्री सिद्धिविनायक कृपा कडाक्ष पूसादसिध्यर्थं समस्त मङ्गळ अवाप्यर्थम् – सिद्धिविनायक पूसादेन ज्ञान वैराग्य सिद्ध्यर्थं, सिद्धिविनायक पूसाद सिद्ध्यर्थं सिद्धिविनाय पुन: पूजाम् करिष्ये । अपउपस्पृश्य ॥ (wash your hands) ॥

**Then proceed with Anga pooja, ashtothram, dhoopam, deepam, neyvedhyam, karpooram, manthrapushpam and do yathaasthaanam with following manthra:**

गजाननं भूतगणादि सेवितं कपित्थ जम्भू फलसारभक्षितं । उमासुतं शोकविनाश कारणं नमामि विघ्नेश्वर पाद पङ्कजं ॥ ऊं भूर्भुव:……अस्मात् मृत्तिका बिम्बात् श्री सिद्धिविनायकं यथास्थानं पूतिष्ठापयामि । शोभनार्थे क्षेमाय पुनरागमनाय च ॥ **(Move the Deity towards north, Do Aachamanam and perform Visarjanam)**

**************

www.pradosham.com

# ॥ विनायक चतुर्थि पूजा विधिः ॥

**- Compiled and presented by Eshwar Gopal and Shankar Ramakrishnan -**

***For and On behalf of Pradosham/Panchangam Group***






***Krishnapuram Sri BalasubramaNya Swami,Sri Abhayahastha Swami***